Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 6 | ISSN : 2581- 6306

# तैत्तिरीयोपषदि पञ्चकोशानां महिमा वर्णनम्



**डॉ. आनन्द कुमार**
**असि.प्रोफेसर –संस्कृत–विभाग**
**राजकीय महिला महाविद्यालय, राबर्ट्सगंज,**
**सोनभद्र,भारत।**

**शोधालेखसार :–** तैत्तिरीयोपनिषदि कोशः पञ्चविधरित्थम् – अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयः च । रस एव अन्नमस्ति। अन्नमाधृत्य सर्वे प्राणिनः जीवनमवधारयन्ति वृद्धिः प्राप्नुवन्ति। प्राणो वायुः तन्मयस्तत्प्रायः अर्थात् तस्मिन् प्राणस्यैव प्रधानता। स एष प्राणमय आत्मा पुरुषविध एव शिरपक्षादिभिः पुरुषाकार एव। अन्योत्तर आत्मा इति मनामयः। अधुना प्रश्नमुतिष्ठति यत् मनः किम् ? संकल्पविकल्पात्मकमन्तः करणं मन इति। अर्थातन्योऽन्तर आत्मा विज्ञानमयो मनोमयस्यमभ्यन्तरो विज्ञानमयः ˙ वेदानामर्थस्य विषये यः निश्चयात्मिकाबुद्धिः तस्य नाम विज्ञानम्। विज्ञानमयेनापरस्यान्तर्वर्ती आत्मा आनन्दमयोस्ति। अयमानन्दो उपासनाकर्मणोः फलमस्ति। सामान्यसुखस्य नामानन्द स प्रियदीनामात्मम सुखावयवानाम।

**मुख्यशब्दः** – तैत्तिरीयोपनिषद्, पञ्चकोशाः, अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयः।

कोशः पञ्चविधः एव–अन्नमयः, प्राणमयः , मनोमयः , विज्ञानमयः , आनन्दमयः च। तैत्तिरीयोपनिषद्येतेषां कोशानां महिमा परस्परसम्बन्धं विविच्यते। उपर्युतपञ्चकोशभिः सम्पूर्णजीवनचक्रः सञ्चाल्यते। जीवनस्य प्रत्येककार्यम् एतेषु कोशेषु मध्ये निहितमेव। तस्मात्कारणात् एतेषां कोशानां महिमा सर्वोपरि वर्तते। वेदान्तेष्वपि कोशानामतेषां तैत्तिरीयोपनिषदमेवाधृत्य वर्णनं प्राप्नोति। तत्र वेदान्ते एतेषु पञ्चसु कोशेषु मध्ये विज्ञानमयमनोमयप्राणमयकोशानामेतत्कोशत्रयं मिलितं सूक्ष्मशरीरमुच्यते। शेष अन्नमयकोशेन स्थूलशरीरस्य निर्मितम्। आनन्दमयकोशेनात्मानं ब्रह्मं वा प्राप्नोति। स्पष्टं यतेतेषां कोशनामाधार उपनिषदमेवास्ति।

तैत्तिरीयोपनिषदि विद्यमाने ब्रह्मानन्दवल्ल्याम् एतेषा ˙पञ्चकोशानां क्रमेण वर्णनं प्राप्यते। तस्मिन् सर्वप्रथममन्नमयोऽस्ति। महिमान्नस्येत्थमस्ति–

**अन्नाद्वै प्रजाः प्रजायन्ते**[1]

रस एव अन्नमस्ति। तस्मास्त्परिणातातन्नाद् एवं स्थावरजंगमाः प्रजाः प्रजायन्ते। यः च पृथिवीमाश्रिताः सर्वा अन्नाद् एव प्रजायन्ते। तदनन्तरं पुनः जातः अन्नः एव जीवन्ति। अन्नमाधृत्य सर्वे प्राणिनः जीवनमवधारयन्ति वृद्धिः प्राप्नुवन्ति वेत्यर्थः। अन्ते च जीवनरुपव्यवहारस्य वृतेर्वा परिसमाप्तिं भूत्वा स अन्नमेव प्रलीयते। तदास्य कारणं किम् ?

अस्योत्तरस्य तैत्तिरीयोपनिषदि अददात् –

SHISRRJ192614 | Received : 01 Nov 2019 | Accepted : 25 Nov 2019 | *November-December-2019* [ 2 (6) : 84-86 ]

**अन्नं हि भूतानां ज्येष्ठम्[2]**

यतो हि अन्नमेव प्राणिनां श्रेष्ठाग्रजं वा। अन्नादीनामितरेषां प्राणिनां सन्ति। तस्य केवलमेव कारणमन्नमस्ति। अतः सम्पूर्णप्रजान्नाद्प्रभवान्नाद्जीवनान्नाद्प्रलयस्यश्चास्ति हि अत्र–

**तस्मात् सर्वौषधमुच्यते[3]**

अर्थात् यस्मात्चैवं तस्मात्सर्वौषधं सर्वभूतानां शरीरतापप्रशमन्नमुच्यते। अधुनान्नब्रह्मविदः परिणाममुच्यते। ते वै समस्तान्नसमूहं प्राप्नुवन्ति। ते के ? अस्योत्तरमयमस्ति यत् अन्नस्यैव ब्रह्मरुपेणोपासते। तेऽहमन्नजः अहमन्नप्रलयः तस्मात्कारणात् अन्नब्रह्मेति। तैत्तिरीयोपनिदि प्राणमयकोशस्येत्थम् –

**तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः[4]**

अर्थात् तस्मादन्नरसमयात्पिण्डादन्यो व्यक्तिरिक्तोऽभ्यनन्तर आत्मा मिश्येव पिण्डवदात्मरुपेण परिकल्पितः प्राणमयोऽस्ति। अधुना प्राणः किम् ? प्राणो वायुः तन्मयस्तत्प्रायः अर्थात् तस्मिन् प्राणस्यैव प्रधानता। येन वायुनेव धोकनी[5] पूर्णोस्ति। तेन प्राणमयेनान्नरसमयः शरीरमपि पूर्णः एव। स एष प्राणमय आत्मा पुरुषविध एव शिरपक्षादिभिः पुरुषाकार एव। उक्तं च – एष पुरुषविध एव तस्य पुरुषविधातामन्वयः पुरुषविधः। किं स स्वत एव पुरुषाकार अस्ति। नेत्याह। शरीरस्यान्नरसमयो पुरुषाकारता प्रसिद्धमेवास्ति। तत् कथं पुनः पूरुषाकारता कस्येत्युच्यते। तस्य प्राणमयस्य प्राण एव शिरः। व्यानो व्यानवृत्तिर्दक्षिणः पक्षः। अपानः उत्तरपक्षः। आकाश आत्मा। य आकाशस्थो समानाख्यः प्राणस्यवृत्तिः आत्मैवात्मा। पृथिवी पुच्छं प्रतिष्ठाञ्च। इयं पृथिवी आध्यात्मिकप्राणमपि धरियित्री।

प्राणं देवा अनुप्राणन्ति। अग्नादयः देवगणाः प्राणशक्तिमान् वायुप्राणस्यानुगामिनी प्राणनकर्म कुर्वन्ति। तथा मनुष्यपश्चादयः सन्ति प्राणकर्मणैव चेष्टावन्तः भवन्ति। प्राण एवं प्राणिनामायुः। अतः स सर्वायुषमुच्यते। यः प्राणं ब्रह्मरुपणोपासते ते पूर्णायुः प्राप्नुवन्ति। अन्नमयकोशस्यैव देहस्थितात्मानमस्ति।

तैत्तिरीयोपनिषदि तृतीयकोशमित्थम् –

**तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमयः[6]**

तस्मातेस्मादित्यादयः उक्तार्थमन्यत्। अन्योत्तर आत्मा इति मनामयः। अधुना प्रश्नमुतिष्ठति यत् मनः किम् ? संकल्पविकल्पात्मकमन्तः करणं मन इति। यः तद्रूपं भवति तनमनोमयः यथान्नाद् कारणादन्नमयः कथ्यते। अयं कोशमपि पुरुषाकार एव भवति। तस्य प्राणमयकोशस्य पुरुषाकारतानुसारेणैवायमपि पुरुषाकार अस्ति । तस्मात्काराणात् यजुः एव शिरः। दक्षिणपक्षः ऋग्। उत्तरपक्षः सामः। आदेशः आत्मा। अथर्वांगिरसः पुच्छः प्रतिष्ठा।

मनोमयकोशस्य महिमा तैत्तिरीयोपनिषदीत्थम्–

**यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह[7]**

तं ब्रह्मानन्दं विद्वान् जातुचित् भयं न प्राप्नोति। तस्य पूर्वकथितप्राणमयस्यैष शरीरे भवः शरीरः।

अथ विज्ञानमयकोशस्य वर्णनमित्थम्–

**तस्मास्द्वा एतस्मान्मनोमयादन्याऽन्तर आत्मा विज्ञानमयः[8]**

तस्माद्वा एतस्माद् वाक्यस्यार्थस्य पूर्ववत्। अर्थातन्योऽन्तर आत्मा विज्ञानमयो मनोमयस्यमभ्यन्तरो विज्ञानमयः वेदानामर्थस्य विषये यः निश्चयात्मिकाबुद्धिः तस्य नाम विज्ञानम्। स चान्तकरणस्याध्यावसायरुपधर्ममस्ति। तन्मयो निश्चयविज्ञानैः। प्रमाणरुपैर्निवर्तित आत्मा विज्ञानमयः। विज्ञानस्य महिमा वर्तते यत् –

**विज्ञानं यज्ञं तनुते[9]**

अर्थात् विज्ञानवान् पुरुष एव श्रद्धापूर्वकं यज्ञानुष्ठानं कराति । अतः विज्ञानस्य कर्तृत्वमस्ति च तत्रैव कर्माणि तनुते। यतो हीत्थं सर्वं कर्तृकं विज्ञानमय आत्मा ब्रह्मेति । सर्वे देवाः ज्येष्ठविज्ञानं ब्रह्ममुपासते।

पञ्चकोशनामन्ते आनन्दमयकोशमित्थम्–

**विज्ञानमयादन्याऽन्तर आत्मानन्दमयः[10]**

अर्थातयं यं विज्ञानमयोऽस्ति तत्रैव स्वपूर्ववर्तीमनोमयशरीरस्यात्मास्ति। अनेन विज्ञानमयेनापरस्यान्तर्वर्ती आत्मा आनन्दमयोस्ति। तस्य आत्मैष एव शरीरे मनोमये भवः शरीरः एव विज्ञानमय। आनन्दमय इति अनेन शब्देन कार्यात्मनः प्रतीयते। यतो हि अत्रैव प्रसंगस्ति ।अन्नादिमया हि कार्यात्मनो भौतिका इहाधिकृता। तस्यान्तर्गते अयमानन्दमयोऽप्यस्ति। अतः आनन्दमयः कार्यात्मा।

अयमानन्दो उपासनाकर्मणोः फलमस्ति। तद्विकार आनन्दमयः। स च विज्ञानमयादान्तरः यज्ञादिहेतोः विज्ञानमयाद् आन्तरत्वश्रुतेः उपासनाकर्मणोः हि फलं भोक्त्रर्थत्वादान्तरतमं स्यात्। अतः आनन्दमयः आन्तरतमः।

तस्यानन्दमयस्यात्मनः पुत्रादयः दर्शनजं प्रियं शिर इव प्राधनतायाः। प्रियं प्राप्तिः हर्षः मोद इति ˙ तत्रैव प्रकृष्टो हर्षः प्रमोद इति सामान्यसुखस्य नामानन्द स प्रियदीनामात्मम सुखावयवानाम्। यतोहि तेषु अनुष्यूतत्वात्।

**सन्दर्भ–**

[1]. तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्याम् ।
[2]. धोकनी जिसमें हवा भर दिया जाता है , उसे धोकनी कहते है ।